न० व्याकरण - ५२६

# नव्यव्याकरणविषयस्य शास्त्रिस्तरीयः पाठ्यक्रमः

पाठ्यांशनाम - परिभाषाध्ययनम् ।

पाठ्यांशसङ्केतः - न.व्या. ३०५

स्तरः - शास्त्री

वर्षम् - तृतीयम्

पत्रम् - पञ्चमम्

व्याकरण-विषय-समितिः

नेपालसंस्कृतविश्वविद्यालयः

२०७९

# नव्यव्याकरणम्

पाठ्यांशनामः– परिभाषाध्ययनम्
स्तरः– शास्त्री
वर्षः– तृतीयः
पत्रम्ः– पञ्चमम्

पाठ्यांशसङ्केतः– न.व्या. ३०५
पूर्णाङ्काः ८०+२०=१००
वार्षिकपाठ्यभारः १६० घण्टात्मकः
साप्ताहिकपाठ्यभारः ६

१. पाठ्यांशपरिचयः–

व्याकरणं नाम वेदाङ्गेषु प्रमुखं मुखस्थानीयं शास्त्रम् । व्याकरणमृते नहि वेदार्थावबोधो न च शास्त्रान्तराध्ययनयोग्यतानिष्पत्तिः । तत्र सत्स्वप्यन्येषु ऐन्द्रचान्द्रादिव्याकरणेषु पाणिनीयव्याकरणस्यैव प्राधान्यम्, एतस्यैव वेदाङ्गत्वेन परिगणनात् । पणिनीयव्याकरणशास्त्रेऽपि सूत्रानुसारिव्याख्यानमाश्रित्य प्रचीनव्याकरणप्रस्थानं प्रक्रियानुसारिव्याख्यानञ्चाश्रित्य नव्यव्याकरणप्रस्थानं प्रसिद्धम् । प्रस्थानद्वयस्यापि मूलं मुनित्रयोपज्ञं शास्त्रमिति नहि सन्देहगन्धावसरः । साम्प्रतं नव्यव्याकरणप्रस्थाने भट्टोजिदीक्षितप्रणीतो वैयाकरणसिद्धान्तकौमुदीग्रन्थस्तथा तदर्थापनाय स्वोपज्ञातः प्रौढमनोरमाख्यष्टीकाग्रन्थो नागेशप्रणीतो लघुशब्देन्दुशेखरश्च विशेषतः प्रसिद्धाः सन्ति । तत्र तत्र पाणिनीयसूत्रसङ्केतबलाद् भाष्योक्त्या तच्छङ्केतेन च सिद्धानां परिभाषाणां सङ्कलनं व्याख्यानञ्च विधाय शिव–सतीतनयेन सर्वतन्त्रस्वतन्त्रेण नागेशेन विदुषा परिभाषेन्दुशेखरनामको ग्रन्थः प्रणीतोऽस्ति । साम्प्रतिकेऽनेहसि वैयाकरणनये परिभाषाध्ययनार्थमयमेव ग्रन्थः प्रमाणिकत्वमावहति ।

यद्यपि नागेशात्प्राग् व्याडिकृतः परिभाषापाठः, सीरदेवविरचितवृत्तिग्रन्थश्च प्राथम्येन परिगणितौ, तथापि परिष्कृतपरिभाषेन्दुशेखरस्यास्यातुलां तुलनां नार्हत इत्येवास्य महत्त्वाख्यापनायालम् । ग्रन्थेऽस्मिन्सङ्कलिताः परिभाषास्त्रिधा विभक्तास्सन्ति - वाचनिक्यः, न्यायसिद्धाः, ज्ञापकसिद्धाश्च । परन्तु कार्यभेदवशात्परिभाषाभेदमाश्रित्य प्रकरणविभागो विधेय इत्यभिप्रेत्य पूर्वोक्तानां परिभाषाणामध्ययनाय ग्रन्थेऽस्मिन् शास्त्रत्वसम्पादन–बाधबीजोपस्थापन–शास्त्रशेषत्वप्रतिपादनरूपाणि त्रीणि प्रकरणानि सन्ति ।

परिभाषेन्दुशेखरग्रन्थे समाविष्टानां प्रकणत्रयस्थानां तासामेव परिभाषाणामध्ययनमुद्दिश्य पाठ्यांशोऽयं विनिर्मितोऽस्ति । नेपाल-संस्कृत-विश्वविद्यालयस्य चतुर्वर्षात्मके स्नातकस्तरे नव्यव्याकरणविषयमाश्रित्य शास्त्रिकक्षायां द्वितीयवर्षे समुत्तीर्णाश्छात्राः प्रासङ्गिकं पारिभाषिकं विषयमधिगच्छेयुरिति धिया शास्त्रितृतीयवर्षे पञ्चमपत्रत्वेन परिभाषाध्ययनमिति विषयो निर्धारितोऽस्ति । अध्ययनसौकर्याय पाठ्यांशोऽयं पञ्चसु प्रकरणेषु विभक्तोऽस्ति । अत्रैतेषु प्रकरणेषु पाणिनीयव्याकरणशास्त्रसम्बद्धप्रक्रियाध्ययनेऽपेक्षितानां तत्तत्परिभाषाणां समावेशो विहितोऽस्ति ।

२. पाठ्यांशस्य सामान्योद्देश्यम्–

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोऽङ्कितेषु विषयेषु प्रावीण्यमधिगमिष्यन्ति–

- पाणिनीयव्याकरणसम्बद्धग्रन्थेषु प्रयुक्तानां परिभाषाणां स्वरूपप्रकाशने ।

- निर्दिष्टपरिभाषाणां समूलं सोदाहरणञ्च व्याख्याने।
- सावतरणं परिभाषार्थविवेचने तत्तल्लक्ष्यसमन्वयने च।
- परिभाषाविषयकमतमतान्तरानुशीलने।
- परिभाषाविषयकनागेशमतप्रदर्शने।
- परिभाषोपयोगपुरस्सरं पदसाधुत्वनिर्धारणे।
- स्वविषयसम्बद्धपक्षोपस्थापनकलाप्रदर्शने।
- शास्त्रीयविषयव्याख्यानकौशलार्जने च।

३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

प्रकरणत्रयस्थविषयाध्ययनेन छात्रा अधोदर्शितेषु विषयेषु प्रावीण्यं समर्जयिष्यन्ति –

| प्रकरणानि | प्रकरणगतविशेष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| (क) | परिभाषेन्दुशेखरग्रन्थस्य ग्रन्थकारस्य च परिचयः। परिभाषेन्दुशेखरस्थव्याख्येयपरिभाषाणां लक्षणविवृत्तिः। शस्त्रत्वसम्पादनोद्देशप्रकरणे बाधबीजप्रकरणे च पठितानां परिभाषाणां सोदाहरणं पार्थक्यप्रदर्शनम्। वाचनिक्यानां, न्यायसिद्धानां, ज्ञापकसिद्धानाञ्च परिभाषाणां पार्थक्यावबोधः। परिभाषोपकारकाणां लौकिकन्यायानां सङ्कलनमर्थबोधश्च। व्याकरणशास्त्रसम्बद्धानां पारिभाषिकशब्दानामर्थापनम्। मङ्गलपद्यव्याख्यानपूर्वकमनुबन्ध-चतुष्टयनिरूपणम्। शास्त्रविषयकसन्देहादनिर्णये निर्णयस्य व्याख्यानापेक्षत्वप्रतिपादनम्। यथोद्देशकार्यकालपक्षयोः सावतरणं पार्थक्यविवेचनम्। अनुबन्धानामेकान्तत्वमनेकान्तत्वं वेति निर्णयः। विविधोदाहरणैरनुबन्धकृतवैशिष्ट्यविमर्शः। कार्यमनुभवतः कार्यिणः कार्यहेतुत्वं नास्तीति सिद्धान्तविचारः। आगमिग्रहणेनागमविशिष्टो गृह्यत इति सिद्धान्तविमर्शः | ग्रन्थकारनागेशभट्टस्य देशकालकृतिवैदुष्यादि-सम्बद्धविषयाः। पूर्वाधारशिक्षणसम्बद्ध-विषयाः। शास्त्रत्वसम्पादनप्रकरणे मङ्गलाचरणपूर्वकं व्याख्यानतो विशेष-प्रतिपत्तिरित्यारभ्य यत्रानेकविधमान्तर्यमि त्यन्ताः परिभाषाः। | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | यदागमेतिपरिभाषाया: सूत्रेणैव गतार्थत्वं नवेति विचार: ।<br>आदेशा निर्दिश्यमानस्यैवेतिपरिभाषाया: सूत्रसिद्धत्वप्रकाशनम् ।<br>अनकेष्वान्तर्येषु स्थानत आन्तर्यस्य बलीयस्त्वनिरूपणम् । | | | |
| (ख) | अर्थवद्ग्रहणेऽनर्थकस्याग्रहणख्यापनम् ।<br>गौणमुख्ययोर्मुख्ये कार्यप्रतीतिरिति सिद्धान्तस्थापनम् ।<br>अर्थवद्ग्रहणस्यापवादत्वेनानिनस्मन् बोधकानि तु अर्थवत्स्वनर्थकेषु चाविशेषेण तदन्तविधिप्रयोजकानि भवन्तीत्युपस्थापनम् ।<br>एकपदार्थेऽन्वितानां पदानां प्रवृत्तिनिवृत्त्यो: सापवादं साहचर्यविचार: ।<br>भाव्यमानानां सवर्णाग्राहकत्वनिरूपणम् ।<br>वर्णप्राधान्ये प्रत्ययलक्षणाभावविमर्श: ।<br>उणाद्यन्ततदादय: शब्दा: प्रकृतिप्रत्ययविभागशून्या भवन्तीति विवेचनम् ।<br>प्रत्ययमात्रबोधकपदेन सापवादं तदादेस्तदन्तस्य च बोधो भवतीति विवेचनम् ।<br>कृद्बोधकपदघटितशास्त्रे गतिकारकपूर्वस्यापि ग्रहणविचार: ।<br>पदाङ्गाधिकृतशास्त्रे विधीयमानकार्याणि सूत्रोपात्तस्य तदन्तस्य च भवन्तीति प्रदर्शनम् ।<br>असहाये कार्ये विधीयमाने व्यपदेशिवद्भावव्यपदेश: ।<br>ग्रहणवत्प्रातिपदिकप्रयोज्यस्य तदन्तविधिर्नेति प्रतिपादनम् ।<br>प्रातिपदिके व्यपदेशिवद्भावाभावविचार: ।<br>अल्बोधकसप्तम्यन्तपदोपादाने तु तदादिविधिरेवेति साधनम् ।<br>सर्वस्यापि द्वन्द्वस्य वैकल्पिकमेकत्वमिति साधनम् ।<br>छान्दसप्रयोगे सर्वेषामपि विधीनां वैकल्पिकत्वप्रकाशनम् ।<br>दृष्टं प्रयोगमनुसृत्य तदनुसारिप्रक्रियाया: प्रकल्पनम् । | शास्त्रत्वसम्पादनप्रकरणे अर्थवद्ग्रहणे नानर्थकस्येति परिभाषात एकदेशविकृतमनन्यवदि त्यन्ता: परिभाषा: । | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | अनुकरणस्यानुकार्यवृत्तिधर्मवत्वसाधनम्।<br>एकदेशविकारवतोऽनन्यवत्वमित्युदाहरणमुखेन<br>साधनम्। | | | |
| (ग) | पूर्वपरादीनामुत्तरोत्तरबलीयस्त्वस्योदाहरणमुखेनोपस्थापनम्।<br>पुनः प्रसङ्गोपादाने तूत्तरस्य बलीयस्त्वनिरूपणम्।<br>शास्त्रद्वयस्य युगपत्प्राप्तौ पूर्वं बाधितस्यैव बाध इति<br>निरूपणम्।<br>ज्ञापकप्रामाण्यात् विकरणापेक्षया नियमशास्त्रस्य<br>बलीयस्त्वविचारः।<br>कृताकृतप्रसङ्गादनित्यशास्त्रान्नित्यशास्त्रस्य<br>बलीयस्त्वप्रतिपादनम्।<br>शास्त्राणां नित्यत्वानित्यत्वयोर्निरूपणम्।<br>बहिरङ्गापेक्षयान्तरङ्गशास्त्रस्य बलवत्वविचारः।<br>अज्निष्ठान्यानन्तर्यनिमित्तकान्तरङ्गे कर्तव्ये जातस्य<br>बहिरङ्गशास्त्रस्यासिद्धत्वं न वेति विमर्शः।<br>विध्यन्तरापेक्षया बहिरङ्गस्यापि लुको बलीयस्त्वमिति<br>साधनम्।<br>अन्तरङ्गबलीयस्त्वस्यापवादान्तरविमर्शः।<br>वार्णादाङ्गस्य बलीयस्त्वनिरूपणम्।<br>पाणिनीयाः शास्त्रप्रवृत्तिविषयकनिश्चये सावधाना<br>भवन्तीति निर्णयः। | बाधबीजप्रकरणस्थपूर्वापरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय इत्यतोऽकृतव्यूहाः पाणिनीया इत्यन्ताः परिभाषाः। | २० | ३२ |
| (घ) | अन्तरङ्गशास्त्रापेक्षयापवादशास्त्रस्य<br>बलीयस्त्वप्रदर्शनम्।<br>आरब्धविधिरवश्यप्राप्तविधेर्बाधको भवतीति साधनम्।<br>उत्सर्गापवादयोर्बलाबलत्वविचारपूर्वकं<br>क्वचिदुत्सर्गस्यापि प्रवृत्तिदर्शनम्।<br>अपवादानामपि पूर्वापरीभावेन बलाबलविनिर्णयः।<br>उत्सर्गापवादशास्त्राणां प्रवृत्तौ नियमाः।<br>अन्यत्र चरितार्थश्चेदन्तरङ्गेणाप्यपवादस्य बाधः।<br>अभ्यासविकारसम्बद्धकार्येषु बाध्यबाधकभावो<br>नास्तीति विमर्शः। | बाधबीजप्रकरणस्थान्तरङ्गदप्यपवादो बलीयान् इत्यतः उभयनिर्देशे पञ्चमीनिर्देशो बलीयानित्यन्ताः परिभाषाः। | २० | ३२ |

CamScanner

| | | | | |
|---|---|---|---|---|
| | वा सरूपविधेरनित्यत्वात् ताच्छीलाद्यर्थेषु क्तल्युट्तुमुन्खलर्थेषु लादेशेषु च तदप्रवृत्तिप्रदर्शनम्।<br>सप्तम्यन्तपञ्चम्यन्तयोर्युगपन्निर्देशे पञ्चमीनिर्देशस्य बलीयस्त्वविचारः।<br>प्रातिपदिकमात्रबोधकपदघटितशास्त्रे लिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणविचारः।<br>सूत्रेषु लिङ्गवचनयोरविवक्षितत्वनिरूपणम्।<br>नञिवयुक्तपदैस्तद्भिन्नतत्सदृशानां ग्रहणमिति प्रतिपादनम्।<br>गतिकारकोपपदानां कृदन्तेन सह समासप्रसङ्गे सुबुत्पत्तेः प्रागेव समास इति प्रदर्शनम्।<br>साम्प्रतिकावस्थायां लक्षणाप्रवृत्तिश्चेद्भूत पूर्वगत्या लक्षणप्रवृत्तिर्विधेयेति विवेचनम्।<br>बहुव्रीहौ तद्गुणातद्गुणसंविज्ञानविवेचनम्।<br>चकारप्राप्तस्योत्तरत्र सम्बन्धाभावप्रदर्शनम्।<br>स्वरविधौ हलः स्थाने स्वरस्य प्राप्तौ च व्यञ्जनस्याविद्यमानत्वमिति विश्लेषणम्।<br>अनुबन्धविषयकविशेषविचारः।<br>स्वार्थिकप्रत्ययानां लिङ्गवचनविषयकं क्वाचित्कं स्वातन्त्र्यमपि दृश्यत इति निरूपणम्।<br>समासान्तविधेरनित्यत्वप्रदर्शनम्। | शास्त्रशेषप्रकरणस्थप्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्यतः सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्यन्ताः परिभाषाः। | | |
| (ङ) | द्वयोः सम्बन्धमभिलक्ष्य विधीयमानं कार्यं तत्सम्बन्धस्य विघातकं न भवतीति निरूपणम्।<br>यत्र द्वयोः सहैव विधानं तत्रैकस्य निवृत्तौ द्वयोरपि निवृत्तिरिति विश्लेषणम्।<br>ताच्छीलिकेऽणे परेऽणप्रत्ययनिमित्तककार्याणि भवन्ति इत्याद्युदाहरणमुखेन प्रतिपादनम्।<br>धातुमुद्दिश्य विधीयमानं कार्यं तदुद्देश्यक प्रत्यये परे भवतीत्युदाहरणमुखेन प्रदर्शनम्।<br>तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणमिति निरूपणम्।<br>सामान्यनिर्देशबलाद्यत्र लुग्विकरणा-लुग्विकरणयोर्ग्रहणं प्राप्तं तत्रालुग्विकरणस्यैव ग्रहणमिति सिद्धान्तोपस्थापनम्। | शास्त्रशेषप्रकरणस्थ-सन्नियोगशिष्टानामन्यतरापाय उभयोरप्यपाय इत्यतः अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणा इत्यन्ताः परिभाषाः। | २० | ३२ |

प्रकृतिबोधकशास्त्रेण ण्यधिकस्यापि ग्रहणमिति विवेचनम्।

अङ्गाधिकारकार्ये विहिते पुनराङ्गकार्यं नभवतीति विचारः।

संज्ञापूर्वकविधेरागमशास्त्रस्य गणकार्यस्य अनुदात्तेत्वलक्षणस्यात्मनेपदस्य नञ्घटितशास्त्रेण विधीयमानस्य कार्यस्यातिदेशिककार्यस्य चानित्यत्वसिद्धिरिति प्रदर्शनम्।

लोपविधेरिड्विधेश्चान्यविधिभ्यो बलवत्वसम्पादनम्।

प्रकृतिमात्रग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति निरूपणम्

प्रधानीभूतविधेये परिभाषाया उपस्थितिर्न त्वप्रधानेऽनुवाद इति साधनम्।

उपपदविभक्त्यपेक्षया कारकविभक्तेर्बलीयस्त्व-सम्पादनम्।

अन्त्यसदेशानन्त्यसदेशयोर्युगपत्प्राप्तावन्त्यसदेशस्यैवेति विचारः।

अभ्यासविकारातिरिक्तेऽनर्थकेऽलोन्त्यस्येतिसूत्राप्रवृत्ति नियमप्रदर्शनम्।

प्रधानाप्रधानयोः कार्यप्राप्तौ प्रधान एव कार्यनिश्चय इतिसिद्धान्तप्रकाशनम्।

अवयवप्रसिद्ध्यपेक्षया समुदायप्रसिद्धेर्बलीयस्त्वसाधनम्।

लक्षानुरोधाद् व्यवस्थितविभाषयापि कार्यसिद्धिरितिनिरूपण्।

यत्र विधेर्नियमस्य च सम्भावना तत्र विधेरेव ज्यायस्त्वमिति साधनम्।

सामान्यधर्मस्यातिदेशे विशेषधर्मस्यानतिदेशनिरूपणम्।

प्रत्ययाप्रत्यययोर्मध्ये प्रत्ययस्य सहचरितासहचरितयोः सहचरितस्य श्रुतानुमितयोः श्रुतसम्बन्धस्य तथा लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्य च प्राधान्यप्रदर्शनम्।

गा-मा-दापदघटितसूत्रेषु विशेषस्याग्रहणमिति निरूपणम्।

लक्ष्यानुरोधेन प्रत्येकं समुदाये वाक्यपरिसमाप्तिरिति निष्कर्षप्रदर्शनम्।

| | | | | |
|---|---|---|---|---|
| | उदात्तादयो गुणाः स्वेतरगुणविशिष्टस्य भेदका न भवन्तीति प्रतिपादनम्।<br>अपवादवन्निपातनान्यप्युत्सर्गस्य बाधकान्येव भवन्तीति विवेचनम् ।<br>कार्यसिद्धावपि लक्ष्ये लक्षणप्रवृत्तिरिति प्रदर्शनम्।<br>पर्जन्यवल्लक्षणप्रवृत्तिरिति निरूपणम्।<br>अन्तरङ्गत्वादुपजीव्यत्वाच्च विधिशास्त्रापेक्षया निषेधशास्त्राणां बलीयस्त्वसाधनम्।<br>अनिर्दिष्टार्थानां प्रत्ययानां स्वार्थिकत्वसम्पादनम्।<br>इष्टसिद्ध्यर्थं योगविभागस्याश्रयणीयत्वसाधनम्।<br>पर्यायवाचकशब्देषु लाघवगौरवचिन्ता नास्तीति विमर्शः।<br>साक्षादुच्चरितव्ये ज्ञापकेन बोधितस्यानित्यत्वकथनम्।<br>द्वित्वभिन्ने पूर्वत्र कर्तव्ये परस्यासिद्धिरिति निरूपणम्।<br>एकस्य स्वरूपस्य प्रयोगेऽन्यस्य प्रयोगाभावविचारः ।<br>सम्प्रसारणस्य तदाश्रयकार्यस्य च बलवत्वनिरूपणम् ।<br>क्वचित्तु विकृत्या प्रकृतेर्ग्रहणं भवतीति साधनम्।<br>औपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणमिति प्रतिपादनम्।<br>यङ्लुकि कतिपयशास्त्राणामप्रवृत्तिनिरूपणम्।<br>योगविभागे गौरवागौरवविमर्शः ।<br>वैयाकरणानां कृते लाघवस्यानुसरणीयत्वम्। | | | |
| | | योगः | १०० | १६० |

५. पाठ्यवस्तुविवरणम्

क प्रकरणे –

परिभाषाध्ययने पूर्वाधारोपलब्धये सम्बद्धग्रन्थस्थभूमिकादिप्रासङ्गिकविषयाः ग्रन्थान्तरस्थाः सम्बद्धविषयाश्च । नत्वा साम्बं शिवं ब्रह्मेत्यादिपरिभाषेन्दुशेखरस्थमङ्गलपद्यम् । शास्त्रत्वसम्पादका अधोदर्शिता व्याख्येयपरिभाषाः -

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्, यथोद्देशं संज्ञापरिभाषम्, कार्यकालं संज्ञापरिभाषम्, अनेकान्ता अनुबन्धाः, एकान्ताः, नानुबन्धकृतमनेकाल्त्वम्, नानुबन्धकृतमनेजन्तत्वम्, नानुबन्धकृतमसारूप्यम्, उभयगतिरिह भवति, कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते,

CS CamScanner

यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते, निर्दिश्यमानस्यादेशा भवन्ति, यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः।

ख प्रकरणे –

शास्त्रत्वसम्पादकाः अधोदर्शिता व्याख्येयपरिभाषाः -

अर्थवद्ग्रहणे नानर्थकस्य, गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः, अनिनस्मिन् ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति, एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः, क्वचिदेकदेशोऽप्यनुवर्तते, भाव्यमानेन सवर्णानां ग्रहणं न, भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति, वर्णाश्रये नास्ति प्रत्ययलक्षणम्, उणादयोऽव्युत्पन्नानि प्रातिपादिकानि, प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्, प्रत्ययग्रहणे चापञ्चम्याः, उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्, स्त्रीप्रत्यये चानुपसर्जने न, संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति, कृद्ग्रहणेगतिकारकपूर्वस्यापि ग्रहणम्, पदाङ्गाधिकारे तस्य च तदन्तस्य च व्यपदेशिवदेकस्मिन्, ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति, व्यपदेशिवद्भावोऽप्रातिपदिकेन, यस्मिन्विधिस्तदादावल्ग्रहणे, सर्वो द्वन्द्वो विभाषयैकवद् भवति, सर्वे विधयश्छन्दसि विकल्प्यन्ते, प्रकृतिवदनुकरणं भवति, एकदेशविकृतमनन्यवत्।

ग प्रकरणे –

बाधबीजसाधका अधोदर्शिता व्याख्येयपरिभाषाः -

पूर्वापरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः, पुनः प्रसङ्गविज्ञानात् सिद्धम्, सकृद्गतौ विप्रतिषेधे, यद्बाधितं तद्बाधितमेव, विकरणेभ्यो नियमो बलीयान्, परान्नित्यं बलवत्, शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति, शब्दान्तरात् प्राप्नुवतःशब्दान्तरे प्राप्नुवतश्चानित्यत्वम्, लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः, क्वचित् कृताकृतप्रसङ्गमात्रेणापि नित्यता, यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्, यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम्, स्वरभिन्नस्य प्राप्नुवन् विधिरनित्यो भवति, असिद्धं बहिरङ्गमन्तरङ्गे, नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः, अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते, पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्येकादेशो न, अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते, वार्णादाङ्गं बलीयो भवति, अकृतव्यूहाः पाणिनीयाः,

घ प्रकरणे –

बाधबीजसाधका अधोदर्शिता व्याख्येयपरिभाषाः -

अन्तरङ्गादप्यपवादो बलीयान्, येन नाप्राप्ते यो विधिरारभ्यतेस तस्य बाधको भवति, क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति, पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्, मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्, अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा, पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः, प्रकल्प्य चापवादविषयम् तत उत्सर्गोऽभिनिविशते, उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते, अपवादो यद्यन्यत्र,

CS CamScanner

चरितार्थस्तद् अन्तरङ्गेण बाध्यते, अभ्यासविकारेषु बाध्यबाधकभावो नास्ति, ताच्छीलिकेषु वासरूपविधिर्नास्ति, क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति, लादेशेषु वासरूपविधिर्नास्ति, उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्।

शास्त्रशेषत्वप्रतिपादका अधोदर्शिता व्याख्येयपरिभाषाः -

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्, विभक्तौ लिङ्गविशिष्टाग्रहणम्, सूत्रे लिङ्गवचनमतन्त्रम्, नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः, गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः, साम्प्रतिकाभावे भूतपूर्वगतिः, बहुव्रीहौ तद्गुणसंविज्ञानमपि, चानुकृष्टं नोत्तरत्र, स्वरविधौ व्यञ्जनमविद्यमानवत्, हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्, निरनुबन्धकग्रहणे न सानुबन्धकस्य, तदनुबन्धकग्रहणे नातदनुबन्धकस्य, क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते, समासान्तविधिरनित्यः, सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य,

ङ प्रकरणे –

शास्त्रशेषत्वप्रतिपादका अधोदर्शिता व्याख्येयपरिभाषाः -

सन्नियोगशिष्टानामन्यतरापाय उभयोरप्यपायः, ताच्छीलिके णेऽण्कृतानि भवन्ति, धातोः कार्यमुच्यमानं तत्प्रत्यये भवति, तन्मध्यपतितास्तद्ग्रहणेन गृह्यन्ते, लुग्विकरणालुविकरणयोरलुग्विकरणस्य, प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्, अङ्गवृत्ते पुनर्वृत्तावविधिः, संज्ञापूर्वकविधेरनित्यत्वम्, आगमशास्त्रमनित्यम्, गणकार्यमनित्यम्, अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्, नञ्घटितमनित्यम्, आतिदेशिकमनित्यम्, सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान्, प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्, विधौ परिभाषोपतिष्ठते नानुवादे, उपपदविभक्तेः कारक-विभक्तिर्बलीयसी, अनन्त्यविकारेऽन्त्यसदेशस्य, नानर्थकेऽलोऽन्त्यविधि-रनभ्यासविकारे, प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः, अवयव-प्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी, व्यवस्थितविभाषयापि कार्याणि क्रियन्ते, विधिनियमसम्भवे विधिरेव ज्यायान्, सामान्यातिदेशे विशेषानतिदेशः, प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम्, सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्, श्रुतानुमितयोः श्रुतसम्बन्धो बलवान्, लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्, गामादाग्रहणेष्वविशेषः, प्रत्येकं वाक्यपरिसमाप्तिः, क्वचित् समुदायेऽपि, अभेदका गुणाः, बाधकान्येव निपातनानि, पर्जन्यवल्लक्षणप्रवृत्तिः, निषेधाश्च बलीयांसः, अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे, योगविभागादिष्टसिद्धिः, पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते, ज्ञापकसिद्धं न सर्वत्र, सम्प्रसारणं पूर्वत्रासिद्धीयमद्वित्वे, एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्याः तृतीयस्याश्च न भविष्यति, औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव तदाश्रयं च कार्यं बलवत्, क्वचिद् विकृतिः प्रकृतिं गृह्णाति, यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि, ग्रहणम्, श्तिपा शपानुबन्धेन निर्दिष्टं यद् गणेन च । पदगौरवाद्योगविभागो गरीयान्, अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः।

६. शिक्षणविधयः, क्रियाकलापाश्च–

अस्य पाठ्यक्रमस्य शिक्षणे प्राधान्येन निगमनागमनव्याख्यानप्रवचनप्रश्नोत्तरात्मका विधय एवानुसरणीयाः । प्रायः संस्कृतव्याकरणस्याध्ययनाध्यापने सम्प्रति एत इव विधयः प्रचलिता दरीदृश्यन्ते । अत एत एव विधयः समुचितरूपेण यथायथं प्रयोक्तव्याः । विशेषतः प्रकृतस्य परिभाषाविषयस्याध्यापने छात्रान् सक्रियान् विधाय शास्त्रीयविषयवस्तुबोधे, विश्लेषणे च विशेषण समुत्प्रेरणीयाः । समयानुकूलमुपलब्धस्याधुनिकप्रविधेः तदनुकूलसामग्र्याश्च प्रयोगेण च छात्रा शिक्षणीयाः । येन च शिक्षणे सारल्यं भवेत् ।

६. मूल्याङ्कनम्–

छात्राणां योग्यताया मूल्याङ्कनं वार्षिकपरीक्षया भवति । परीक्षायां १०० पूर्णाङ्का भविष्यन्ति । तत्र २० पूर्णाङ्कानां परीक्षा विद्यापीठस्यान्तरिकी परीक्षा भविष्यति । विश्वविद्यालयान्तर्गत-परीक्षा-नियन्त्रणकार्यालयद्वारा ८० अङ्कानामेव लिखितपरीक्षा विधाष्यते । परीक्षापरिणामप्रकाशनावसरे आन्तरिकी बाह्या चेत्युभयमाहत्य १०० पूर्णाङ्कानां परीक्षाफलं प्रकाशयिष्यते ।

(क) आन्तरिकमूल्याङ्कयोजना-

| शीर्षकम् | अङ्काः |
|---|---|
| उपस्थितिः | ३ |
| कक्षाकार्यकलापः | ३ |
| प्रतिवेदनलेखनम्, परियोजनाकार्यञ्च | ६ |
| आन्तरिकी परीक्षा | ८ |
| योगः | २० |

(ख) बाह्यमूल्याङ्कनयोजना-

| समूहः | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसंख्या | समाधेयाः प्रश्नसंख्या | अङ्का | पूर्णाङ्का |
|---|---|---|---|---|---|
| क, | विवेचनात्मकाः | ३ | २ | (१०×२) | २० |
| ख, | व्याख्यानात्मकाः | ३ | २ | (८×२) | १६ |
| ग, | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | (६×६) | ३६ |
| घ, | वस्तुगताः | ८ | ८ | १×८ | ८ |
| | योगः | २३ | १८ | | ८० |

७. पाठ्यग्रन्थसूची

(क) पाठ्यग्रन्थः–

१. परिभाषेन्दुशेखरः, (सम्पूर्णः) नागेशभट्टविरचितः।

(ख) सन्दर्भग्रन्थाः–

१. परिभाषेन्दुशेखरः, नागेशभट्टविरचितः, शेषशर्मसूरिविरचित–सर्वमङ्गला-व्याख्यासमन्वितः, वि.सं. २०४४ सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी।

२. परिभाषेन्दुशेखरः, नागेशभट्टविरचितः, म.म.कै. तात्याशास्त्रीविरचित–भूतितिलकटीकाविलसितः, वासुदेवबालकृष्णपटबद्र्धन, राजराजेश्वरी पुस्तकालय, दुर्गाघाट, वाराणसी।

३. परिभाषेन्दुशेखरः, नागेशभट्टविरचितः, हैमवतीटीकासमन्वितः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

४. परिभाषेन्दुशेखरः, नागेशभट्टविरचितः, जयदेवमिश्रविरचित–विजयाटीकासमन्वितः, दी इलाहवाद जनरल प्रेस इलाहावाद।

५. परिभाषेन्दुशेखरः, नागेशभट्टविरचितः, जयदेवमिश्रविरचित–विजयाटीकासमन्वितः, २००९ ई. चौखम्बा विद्याभवन, वाराणसी।

६. परिभाषेन्दुशेखरः, नागेशभट्टविरचितः, हर्षनाथमिश्रविरचित–दुर्गाख्यसंस्कृतव्याख्यया हिन्दीभाष्येण च समन्वितः, १९८७ ई. राष्ट्रिय संस्कृतसंस्थानम्, दिल्ली।

७. परिभाषेन्दुशेखरः, नागेशभट्टविरचितः, विश्वनाथमिश्रविरचितसुबोधिनीटीकासमन्वितः, २००३ ई. चौखम्बा सुरभारतीप्रकाशन, वाराणसी।

८. परिभाषेन्दुशेखरः, नागेशभट्टविरचितः, केशवशरणोपाध्यायप्रणीतबोधप्रकाशिकाटीका-सहितः, वि. सं. २०७६, श्रीमुकेशशर्मा/श्रीमती डा. सुमित्रा, अभिषेकप्रकाशन, दिल्ली।

९. परिभाषासंग्रहः, भाण्डारक रिसर्च इन्स्टिच्युट, पूना।



CamScanner

# विशिष्टीकरण-तालिका

| प्रकरणम् | विवेचनात्मकाः | | | व्याख्यानात्मकाः | | | संक्षिप्तोत्तरात्मकाः | | | वस्तुगताः | पूर्णाङ्काः |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | प्रष्टव्याः प्रश्नाः | समाधेयाः प्रश्नाः | | प्रष्टव्याः प्रश्नाः | समाधेयाः प्रश्नाः | | प्रष्टव्याः प्रश्नाः | समाधेयाः प्रश्नाः | | समाधेयाः प्रश्नाः | अङ्काः |
| क | २ | १ | १० | - | - | - | १ | १ | ६ | | १६ |
| ख | - | - | - | १ | १ | ८×१=८ | १ | १ | ६ | २ | १६ |
| ग | १ | १ | १० | - | - | - | २ | १ | ६ | | १६ |
| घ | - | - | - | २ | १ | ८×१=८ | २ | १ | ६ | २ | १६ |
| ङ | - | - | | - | - | | ३ | २ | ६×२=१२ | ४ | १६ |
| योगः | ३ | २ | २० | ३ | २ | १६ | ९ | ६ | ३६ | ८ | ८० |

## आदर्शप्रश्नपत्रम्

परीक्षाः- शास्त्री
खण्डः- तृतीयः

विषयः-नव्यव्याकरणम्
पत्रम् - पञ्चमम्

पूर्णाङ्काः-८०
उत्तीर्णाङ्काः ३२

### समूहः क

१. सर्वेऽपि प्रश्नाः स्वल्पैः शब्दैः समुत्तरणीयाः १×८=८

क) परिभाषेन्दुशेखरग्रन्थस्य रचयिता कः?

ख) व्याख्येयपरिभाषायाः लक्षणं किम् ?

ग) प्रोढवान् इत्यत्र वृद्धिनिवारणेऽपेक्षिता परिभाषा का ?

घ) उणाद्यन्ततदादिशब्देषु प्रकृतिप्रत्ययविभागोऽपेक्षितो न वा ?

ङ) आगमादेशयोः को भेदः ?

च) अनुपसर्जनशब्दस्य कोऽर्थः?

छ) अनुदात्तेत्वलक्षणमात्मनेपदं नित्यमनित्यं वा ?

ज) परिभाषेन्दुशेखरग्रन्थे संकलिताः परिभाषाः कियत्यः सन्ति ?

### समूहः खः

अधोदर्शितप्रश्नानां नातिविस्तृतमुत्तरं विलिख्यताम् ६×६=३६

२. नत्वा साम्बं शिवं ब्रह्मेत्यादिमङ्गलपद्यं व्याख्यायताम् ।

३. अनुबन्धानामेकान्तत्वानेकान्तत्वे तदुदाहरणानि च प्रस्तूयन्ताम् ।

अथवा

अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् इति परिभाषा व्याख्यायताम् ।

४. अन्तरङ्गत्वबहिरङ्गत्वे परिचाय्य तयोर्बलाबलत्वे प्रदर्श्येताम् ।

अथवा

वार्णादाङ्गस्य बलीयस्त्वे युक्तयः समीक्ष्यन्ताम् ।

५. लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषा सोहापोहं व्याख्यायताम् ।

अथवा

६. रामौ इत्यत्र कार्यकालपक्षे कथं पदत्वमिति समाधीयताम् ।

७. नमस्करोति देवानित्यादौ नमोयोगेन प्राप्ता चतुर्थी परिह्रियताम् ।

अथवा

परिषेन्दुशेखरग्रन्थस्य प्रकरणत्रयविभागे वाचोयुक्तयः प्रदर्श्यन्ताम् ॥

### समूहः गः

अधोदर्शितप्रश्नयोर्व्याख्यानात्मकमुत्तरं प्रदीयताम् ८×२=१६

८. गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति परिभाषायास्तात्पर्यमुल्लिख्यताम् ।

अथवा

सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषेयं सावतरणं व्याख्यायताम् ।

९. अकृतव्यूहाः पाणिनीयाः इति परिभाषाया लोकसिद्धत्वं विव्रियताम् ।

## समूहः घः

अधोदर्शितप्रश्नयोः सविस्तरमुत्तरं विलिख्यताम् १०×२=२०

१०. यथोद्देशकार्यकालपक्षयोः पार्थक्यं यथाग्रन्थं विविच्यताम् ।

११. पूर्वपरादीनामुत्तरोत्तरबलीयस्त्वमुदाहरणमुखेनोपन्यस्यताम् ।

अथवा

गतिकारकोपपदानां कृद्भिः सह समासवचने सुबुत्पत्तेः प्रागेव समासविधाने युक्तयः समीक्ष्यन्ताम् ।

******

CamScanner